वाक्यपदीये हेलाराजकृतप्रकाशटीकासहिते साधनसमुद्देशे करणाधिकारविमर्शः

अभिजित् दासः *

Abstract

[कारकं व्याकरणशास्त्रे बहुलं प्रसिद्धम्। सन्दर्भेषु प्राप्यमाणायाः कारकचर्चायाः मूलभूतं तत्त्वं वाक्यपदीये निरूपिताः कारिकाः। इतः एव अन्यत्र शेखरादिषु ग्रन्थेषु विचाराः स्वीकृताः। कारकेषु प्रकृष्टतमस्य करणस्य विषये अत्र शोधपत्रे चर्चा विहिता। करणस्य प्रकृष्टतमत्वम्, तत्स्वरूपम्, करणस्य भेदाः च कथं सम्भवन्तीत्यादिविषयाः हेलाराजाचार्यविरचितप्रकाशटीकानुसारं सरलया व्याख्यानात्मकपद्धत्या शोधेऽस्मिन् उपन्यस्ताः। करणसंज्ञा कस्य स्यात्, कर्तुः करणत्वशङ्कानिरासः चेत्येते विषयाश्च अत्र उपस्थापिताः।]

कुञ्चिकाशब्दाः— वाक्यपदीयम्, प्रकीर्णप्रकाशः, करणम्, तमब्ग्रहणम्, साधनम्, कारकम्।

उपक्रमः

भाषागतप्रयोगपद्धतेः बीजभूतं तावद् व्याकरणम्। भाषायाः शिक्षणदशायां व्याकरणज्ञानपुरःसरं प्रयोगाः यद्यपि न सम्भवन्ति तथापि व्याकरणं तत्र मेरुदण्डस्वरूपेण आलम्बनरूपेण वा उपस्थितमिति सर्वविदितम्। तत्रापि व्याकरणे अत्यावश्यकः सुप्रसिद्धश्च विषयः कारकम्। षट्सु कारकेषु क्रमानुसारेण तृतीयस्थानमधिकरोति करणकारकम्। सम्प्रति करणकारकविषये वाक्यपदीयानुसारं प्रकाशटीकानुसारञ्च यथामति विवरणं प्रस्तूयते।

१. वाक्यपदीयस्य तत्कर्तुश्च परिचयः— वाक्यपदीयकृत् आचार्योऽयं कुत्रापि ग्रन्थेषु स्वपरिचयादिकं नैव प्रकटयामास। तस्मात् केचन अनुमानेन तस्य कालः सप्तमशताब्द्याः उत्तरार्धम् उररीकुर्वन्ति। काशिकायाः अध्ययनकाले तत्रत्यविषये वाक्यपदीयग्रन्थस्य सङ्केतलाभात् काशिकायाः रचनाकालम् अनुसृत्य सप्तमशतके अयम् आसीत् इति अनुमीयते। एतेन वाक्यपदीयग्रन्थः काशिकायाः प्राक् इति स्फुटीभवति। पुण्यराजाचार्याणां

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु; Email : dasavi82934rkmveri@gmail.com

मते भर्तृहरेः गुरुः वसुरातेति । महाभाष्यदीपिका, वाक्यपदीयम्, भागवृत्तिः, मीमांसाभाष्यम्, वेदान्तसूत्रवृत्तिः चेत्यादिग्रन्थाः एभिः विरचिताः ।

२. प्रकाशटीकायाः तत्कर्तुश्च परिचयः— प्रकाशटीकायाः कर्तारः इमे हेलाराजमहाभागाः । आचार्याणां पितुर्नाम भूतिराजः । अभिनव-गुप्ताचार्याणाम् एते गुरवः आसन् इति प्रसिद्धिः । काश्मीरराजस्य मुक्तापीडमहीपतेः मन्त्रिणः वंशे अर्थात् मन्त्रिणः लक्षणस्य वंशे जातोऽयं हेलाराजाचार्यः । दशमशतकस्य पूर्वार्धः आचार्यस्यास्य जन्मवर्षत्वेन परिगण्यते । क्रियाविवेकः, अद्वयसिद्धिः, वार्तिकोन्मेषः चेत्यादिग्रन्थाः आचार्येण प्रणीताः । वाक्यपदीयस्य प्रकाशाख्या इयं टीका हेलाराजस्य अन्यतमा कृतिः । प्रकाशटीकायाः प्रकीर्णप्रकाशः इत्यपि नामान्तरम् । एते वाक्यपदीयश्लोकेषु विस्तृतानि विकीर्णानि च तत्त्वानि प्रकाशटीकाख्ये स्वव्याख्याने उपस्थापयामासुः ।

शोधसमस्या

क्रियासिद्धौ उपकारकाणि साधनानि कारकाणि । तत्रापि अतिशयेन क्रियोपकारकत्वं करणकारकस्य । करणसंज्ञा कस्य स्यात्, करणस्य भेदाः च कथं स्युः चेति विषये संशयाः जायन्ते । तत्र चर्चायां सत्यां कर्त्रादीनामपि करणत्वशङ्कायाः उद्भवात् तन्निरासः कथमित्यपि ज्ञातव्यम् । तस्मात् वाक्यपदीयानुसारं प्रकाशटीकानुसारेण च एतेषां संशयानां निवृत्त्यर्थं प्रकृतशोधपत्रमिदम् आरभ्यते । असिः छिनत्तिः, तैक्ष्ण्यं छिनत्तिः इत्यादिप्रयोगानां तात्पर्यं न सर्वैः सम्यक् ज्ञायते । अतः शोधेनानेन सारल्येन ते विषयाः टीकानुरोधेन प्रकट्यन्ते ।

शोधप्रविधिः

शोधपत्रेऽस्मिन् व्याख्यानात्मिका शोधपद्धतिः मया स्वीकृता । आदौ लघुशब्देन्दुशेखरादिग्रन्थेषु प्रतिपादितस्य करणकारकस्य अध्ययनं विहितम् । विशेषतया वाक्यपदीये पदकाण्डे साधनसमुद्देशस्य टीकायाः प्रकाशाख्यायाः अवधानसहितम् अध्ययनं विहितम् । तत्र अध्ययने प्राप्तानां विषयाणां कथम् उपस्थापनं स्यात्, तेषां विषयाणां क्रमादिपुरःसरमुपस्थापनञ्च कथं स्यादिति विचारितम् । हेलाराजव्याख्यायां करणविषये प्राप्ताः विषयाः सारल्येन शोधपत्रेऽस्मिन् उपस्थापिताः ।

साधनम्

साधनम् उपकारकम्। क्रियायाम् उपकुर्वत् तत् साधनमिति नाम्ना अभिधीयते। उच्यते हि वाक्यपदीयकारिकायां साधनसमुद्देशे—

स्वाश्रये समवेतानां तद्वदेवाश्रयन्तरे।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः॥

[वाक्यपदीयम् ३.७.१]

यथा रामः तण्डुलं पचतीति वाक्ये कर्तृत्वशक्तिरूपं सामर्थ्यं स्वाश्रये रामे समवेतायाः व्यापाररूपायाः क्रियायाः निष्पत्तौ साधनं भवति। एवमेव कर्मत्वशक्तिरूपं सामर्थ्यं स्वाश्रये तण्डुले समवेतायाः फलरूपक्रियायाः निष्पत्तौ साधनम्। एतादृशमेव कुठारेण छिनत्ति इत्यादिस्थले करणमपि कुठारः स्वभिन्नाश्रये वृक्षे स्थितायाः छेदनक्रियायाः निष्पत्तौ उपकुर्वत् साधनं भवति। एतेषु साधनेषु ज्ञातेषु प्रकृष्टतमस्य साधनस्य करणसंज्ञा भवति। इदानीं प्रकृष्टतमत्वं नाम किमिति विषये विस्तरेण आलोच्यते।

करणसंज्ञा

सिद्धान्तकौमुद्यां साधकतमं करणमिति सूत्रे करणसंज्ञायाः विषये उक्तम् "क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्"[१] इति। प्रकृतसूत्रे तमप्-प्रत्ययः अतिशयार्थं गमयतीति प्रकृष्टस्य उपकारकस्य करणसंज्ञा। एतद्विषयकं हरिवचनं तावत्—

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्॥

[वाक्यपदीयम् ३.७.९०]

अस्यार्थस्तावत् क्रियाजनने यद्व्यापारस्य अव्यवहितपूर्ववर्तितया अवस्थानं विवक्ष्यते अर्थात् यद्व्यापारानन्तरमेव फलनिष्पत्तिः तत् प्रकृष्टमुपकारकम्। तदेव प्रकृष्टोपकारकं करणमिति नाम्ना अभिधीयते। अस्यां कारिकायां क्रियाशब्दः फलपरः। तथाहि उदाहरणम्— रामेन बाणेन हतो बाली। अत्र उक्तलक्षणानुसारेण अव्यवहितरूपेण स्थितेन बाणगतव्यापारेणैव बालिनः मृत्युकारणात् तद्व्यापाराश्रयस्य बाणस्य करणसंज्ञा। करणसंज्ञायां सत्यां "कर्तृकरणयोस्तृतीया" [अष्टाध्यायी २.३.१८] इति सूत्रेण तृतीया विभक्तिः भवति। उदाहरणसमन्वये कृतेऽपि

[१] वैयाकरणसिद्धान्तकौमुदी, सूत्रसंख्या ५६०, पृ. ८४

साधकतमेति सूत्रे तमब्ग्रहणेन प्रकृष्टत्वं गम्यते नवेति विषये विवदन्ति आचार्याः । तस्मात् प्रसङ्गवशात् शेखरे विवृतः तमब्ग्रहणवैयर्थ्यविचारः सम्प्रति प्रस्तूयते ।

१. तमब्ग्रहणस्य वैयर्थ्यप्रतिपादनम्— साधकतमं करणमिति सूत्रे तमब्ग्रहणं चतुर्धा निराकर्तुं शक्यते । तथाहि— प्रथमतः क्रियते अनेनेति करणल्युडन्तशब्देन करणमिति साधकत्वलाभे सति सूत्रे पुनः साधकग्रहणं प्रकृष्टत्वार्थम् अतो नावश्यकं तमपः ग्रहणम् ।

द्वितीयतः, कारकाधिकारसत्त्वे क्रियाजनने उपकारकार्थस्य लाभात् पुनः साधकग्रहणं प्रकृष्टत्वं गमयति । अतः तमपः ग्रहणं न कर्तव्यम् ।

तमब्ग्रहणं मुख्यगौणयोः उपकारकयोः गौणस्य उपकारकस्य करणत्वबाधनार्थम् इति चेत् न, "गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः"[२] इति परिभाषया मुख्यस्यैव अर्थात् प्रकृष्टत्वस्यैव करणस्य लाभात् गौणकरणस्य बाधे अनावश्यकत्वात् तमप्-प्रत्ययो नावश्यकम् इति तृतीयः पक्षः ।

तमब्ग्रहणाभावे रामः बाणेन बालिनं हतवान् इत्याद्युदाहरणेषु गौणस्य रामस्यापि करणत्वं भवतु रामगतव्यापारेणैव बाणस्य प्रेरितत्वात् इति चेन्न परया कर्तृसंज्ञया रामादिकर्तृणां करणत्वशङ्का दूरीभवति । अतः तमब्ग्रहणं न कर्तव्यमिति चतुर्थः पक्षः ।

२. व्यर्थं सत् वचनज्ञापनम्— व्याकरणशास्त्रे किमपि व्यर्थं सत् किञ्चित् वचनं ज्ञापयति । तस्मात् प्रकृतेऽपि तमब्ग्रहणं व्यर्थं सत् ज्ञापयति यत् कारकाधिकारे द्रव्यप्रकर्षः, "गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः" इति परिभाषा च नाश्रीयते । फलरूपेण तमब्ग्रहणेनैव सूत्रेऽस्मिन् प्रकृष्टत्वं सम्भवतीति तमब्ग्रहणमावश्यकमिति व्यर्थत्ववादिनः परास्ताः । एतेन स्वांशे चारितार्थ्यमुपपन्नम् ।

३. ज्ञापितवचनस्य प्रयोजनम्— ज्ञापितवचनस्य फलम् आधारोऽधिकरणमिति सूत्रे दृश्यते । तत्र अधिक्रियते अस्मिन् इति अधिकरणल्युडन्तेन अधिकरणशब्देन एव आधारत्वे लब्धे पुनः आधारग्रहणं प्रकृष्टार्थमिति चेत् प्रकृष्टाधारत्वस्य विवक्षायां सर्वावयवव्याप्त्या अवस्थितस्यैव आधारस्य ग्रहणात् गङ्गायां घोषः इति स्थले घोषस्य

[२] परिभाषेन्दुशेखरम्, परिभाषासंख्या १५, पृ. ७०

सामीप्यसम्बन्धेन आधेयत्वात् प्रयोगस्यानापत्तिः । गङ्गायां गावः इत्यपि प्रयोगो न स्यात् । अतः अस्मिन् स्थले तमब्ग्रहणवैयर्थ्येन यत् फलं तत् प्रदर्श्यते । द्रव्यप्रकर्षाभावात्, गौणमुख्यपरिभाषायाः प्रवर्तनाभावे च अत्र गौणस्य मुख्यस्य च आधारसंज्ञा सेत्स्यति । तेन तिलेषु तैलमितिवत् गङ्गायां घोषः, गावः इत्यादीनामपि प्रयोगानां सिद्धिः ।

४. तमब्ग्रहणं न व्यर्थमिति इति पक्षे आधारविचारः— केचन आक्षिपन्ति तमब्ग्रहणं चरितार्थम् । चरितार्थत्वस्वीकारे सति द्रव्यप्रकर्षस्य गौणमुख्यपरिभाषायाश्च कारकाधिकारे प्रवृत्त्यबोधनात् मुख्यस्यैवाधारस्य अधिकरणसंज्ञा प्राप्ता । एवं गङ्गायां घोषः इत्यादीनां प्रयोगानापत्तिः । तदा तैः समाधानत्वेन "स्वरितेनाधिकारः" इति सूत्रबलात् आधारपदे स्वरितत्वप्रतिज्ञया अधिकं कार्यं प्रोच्यते । तत् कार्यं तावत् गौणेऽपि आधारे अधिकरणसंज्ञा क्रियते । तेन अस्मिन् मतेऽपि तिलेषु तैलवत्, गङ्गायां घोषः इत्यादिस्थले प्रयोगाः सिद्ध्यन्ति ।

एवं करणलक्षणं प्रकृष्टत्वविचारञ्च उपस्थाप्य तद्भेदाः प्रकाशटीकायां प्राप्ताः करणविषयकविचाराश्च सम्प्रति उपस्थाप्यन्ते ।

विवक्षया करणत्वम्

सन्निपत्योपकारकं प्रकृष्टं साधकमेव करणसंज्ञकमिति चेन्न विवक्षया स्वीकृतार्थस्य व्याकरणे अङ्गत्वेन ग्रहणात् । विवक्षातः कारकाणि भवन्ति इति वचनस्यैव इदं फलितार्थकथनम् । तस्मादेव बलेन लुनाति, आलोकेन पश्यति इत्यादिस्थले यथाक्रमं दात्रचक्षुषीत्यादिकम् अनादृत्य बलालोकयोः छेदने दर्शनक्रियायां च अतिशयत्वाकाङ्क्षायां करणत्वेन ग्रहणम् । तथाहि प्रकाशटीकायां भणितं हेलाराजेन "विवक्षोपारूढ एव ह्यर्थो व्याकरणेऽङ्गम्, न बाह्यवस्तुसत्तेत्यर्थः"[३] इति ।

करणस्य वस्तुव्यवस्थितत्वाभावः

करणसंज्ञा अस्यैव स्यात् अथवा इदं वस्तु करणमेव इत्यादिरपि न चिन्तनीयः । विवक्षातः करणत्वं सम्भवति । तथाहि स्थाल्यां पचति इति हि लोके व्यवह्रियमाणं वाक्यम् । एतेन स्थाल्याः अधिकरणत्वं सर्वैर्ज्ञायते । परन्तु तनुतरकपालकारणात् पाके इयं स्थाली प्रकृष्टोपकारिका इति स्थाल्याः

[३] वाक्यपदीयम्, साधनसमुद्देशः, पृ. २७४

अतिशयेन प्रकृष्टत्वविवक्षया स्थाल्या पच्यते इत्यपि प्रयोगः क्रियते । एतेन करणस्य वस्तुव्यवस्थितत्वं न सम्भवति । तथाहि हरिकारिका—

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥

[वाक्यपदीयम् ३.७.९१]

एतेन विवक्षानुसारं पदार्थानां तत्तत्कारकेषु अन्तर्भावः वक्रा क्रियते इति स्पष्टं ज्ञातं भवति ।

करणानां स्वजातीयेषु प्रकृष्टत्वविचारः

ननु विवक्षितं प्रकृष्टं साधकं करणमिति स्वीकृते सति "अश्वेन पथा दीपिकया याति" इत्याद्युदाहरणेषु प्रकृष्टत्वं कस्य इति चेत् स्वकक्ष्यासु करणस्य तथा विचारो न क्रियते । कारकान्तरेभ्यः प्रकर्षः तमप्रत्ययेन उच्यते । अतः सजातीयापेक्षस्य प्रकर्षस्य प्रकृतस्थले करणविषये विचाराभावात् कर्त्रादिकारकेभ्यः अयं प्रकर्षः इति लभ्यते । ततश्च अश्वादित्रयाणां करणत्वं, मिथः अविरुद्धं सत् विराजते । तत्र अश्व उत्तरदेशसंयोगे कर्त्राद्यपेक्षया प्रकृष्टः, पन्थाः चौरादिविपद्रहिततया कारकान्तरेभ्यः प्रकृष्टम्, दीपिका च तमसः अपसारणेन गमने कारकान्तरेभ्यः प्रकृष्टम् ।तथाहि हरिकारिकायाम् उक्तम्—

स्वकक्ष्यासु प्रकर्षश्च करणानां न विद्यते ।
आश्रितातिशयत्वं तु परतस्तत्र लक्षणम् ॥

[वाक्यपदीयम् ३.७.९३]

कारिकायामपि परतः इति शब्दस्य साधनान्तरात् इत्येव अर्थः लिखितः । तेन अन्येभ्यः कारकेभ्यः एव करणस्य अतिशयत्वं काङ्क्षते न तु स्वजातिषु इति स्पष्टं भवति ।

कर्तुः करणत्वशङ्का तस्य द्विधा निरासश्च

कर्त्रा प्रेरिते सति साधनानां क्रियासिद्ध्यर्थं प्रवृत्तिः । तस्मात् कर्तरि विनियुक्ते सति एव क्रियासिद्धेः, कर्तुः करणत्वशङ्का इति चेन्न आरादुपकारित्वात् स्वतन्त्रत्वाच्च । कर्तुः करणत्वशङ्का अनुचिता दूरादेव क्रियासिद्धौ उपकारकत्वात् । साधनान्तराणां व्यापारैः कर्तृव्यापारस्य व्यवधानात् न ततः अव्यवहितकाले फलनिष्पत्तिः । तस्मात् कर्तुः करणत्वस्वीकारः नोचितः इति करणत्वनिरासे प्रथमः पक्षः ।

कर्तुः स्वातन्त्र्यात् तदधीने एव अन्येषां प्रवृत्तेः अन्यैः कारकैः अस्य तुलना न कार्या । न हि कदाचित् भृत्यैः सह प्रभोः तुलना क्रियते । अतः भिन्नजातीयत्वात् कर्तुः करणत्वशङ्का न कर्तव्या इति द्वितीयः पक्षः । कर्तुः स्वातन्त्र्ये प्रमाणं हि साधनसमुद्देशस्य कर्त्रधिकारस्थकारिका[४] ।

कर्तृकरणयोः भेदः

कर्ता करणाद् पृथगिति उच्यमाने असिः छिनत्तिः इत्यादिप्रयोगस्य अनापत्तिः इति चेन्न स्वातन्त्र्येण असेः विवक्षितत्वात् । अत्र कर्तृविनियोगस्य तिरस्कारेण असिः कर्तृत्वेन विवक्ष्यते, तैक्ष्ण्यादिगुणाश्च करणत्वेन उपतिष्ठन्ते । यदा तु तैक्ष्ण्यादिगुणानामपि स्वातन्त्र्येण विवक्षा तदा तु शब्दभेदेन उपाधिभेदं जनयित्वा तैक्ष्ण्यं छिनत्ति स्वसामर्थ्येन इति प्रयोगः ।

ननु एवं कर्तृकरणयोर्भेदे संज्ञयोः एकत्राप्राप्तौ करणं पराणि बाधन्ते इति वचनस्य कथं सङ्गतिरिति चेत् काल्पनिकभेदसत्त्वात् वास्तविकभेदाभावेऽपि वचनसङ्गतिः । अथवा, शक्त्याधारस्य द्रव्यस्य एकत्वात् वचनं सङ्गच्छते । तथाहि वाक्यपदीयकारिकायाम्—

आत्मभेदेऽपि सत्येवमेकोऽर्थः स तथा स्थितः ।
तदाश्रयत्वाद् भेदेऽपि कर्तृत्वं बाधकं ततः ॥

[वाक्यपदीयम् ३.७.९७]

सन्निपातासन्निपातयोः करणत्वम्

सन्निहिताः कुठारादयः यथा समीपे विद्यमानाः करणसंज्ञां प्राप्नुवन्ति, तद्वत् असन्निधानेऽपि करणत्वं सम्भवति । धनाभावेन मुक्तः इति उदाहरणे समीपे अविद्यमानमपि धनं मुक्तेः कारणत्वेन उपतिष्ठते । अतः अविद्यमानेन करणत्वं न स्यादिति आशङ्का न कर्तव्या । उक्तं हि साधनसमुद्देशे—

यथा च सन्निधानेन करणत्वं प्रतीयते ।
तथैवासन्निधानेऽपि क्रियासिद्धेः प्रतीयते ॥

[वाक्यपदीयम् ३.७.९८]

---

[४] प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात्,प्रवृत्तानां निवर्त्तनात् ॥ [वाक्यपदीयम् ३.७.१०१]
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते ॥ [वाक्यपदीयम् ३.७.१०२]

भेदाभेदविवक्षया करणत्वम्

ग्रामाद् आगच्छति, ग्रामस्य समीपाद् आगच्छति वा इति प्रयोगद्वयमपि सम्भवति । क्रियायाः अवधेः भेदेन अभेदेन च विवक्षायाम् उदाहरणद्वयमिदम् । एवमेव करणेष्वपि भेदविवक्षया अभेदविवक्षया च प्रयोगाः सम्भवन्ति । यथा काष्ठतेजसोः अभेदविवक्षायां देवदत्तः काष्ठैः पचतीति प्रयोगः । भेदविवक्षायां तु एधाः पक्ष्यन्ति तेजसा इति प्रयोगः । उष्णातातेजसोरपि यदा भेदेन विवक्षा तदा तेजः पचति औष्ण्येन इति प्रयोगः । एवं विवक्षाकारणात् करणव्यवस्था ज्ञातव्या ।

शोधनिष्कर्षः

अन्ततः प्रकृतशोधपत्रस्य पर्यालोचनेन इदम् अवगतं यत् करणं विवक्षाधीनम् । कर्त्रापेक्षया करणस्य विजातीयत्वात् उभयोः तुलना न कर्तव्या इति ज्ञातव्यम् । करणस्यापि कर्तृत्वेन विवक्षायां व्यवहारः भवितुमर्हति तदा च करणं किमिति तदनुकूलतया करणादिविचारः कर्तव्यः । वक्तुः विवक्षानुसारं पदार्थानां सामर्थ्ये सत्त्वे तत्तत्कारकत्वेन व्यवहारः शक्यः । व्याकरणे पदार्थमात्रम् अङ्गीक्रियते न बाह्यवस्तुसत्ता आवश्यकी । बौद्धिकसत्तयापि इष्टव्यवहारः सम्भवति । करणसूत्रे तमपः प्रकृष्टत्वं कारकान्तरेभ्यः करणस्य अतिशयत्वं प्रकटयति न तु करणानां स्वजातौ प्रकृष्टत्वविचारः शङ्कनीयः ।

उपसंहारः

उपर्युक्तविचारेण पूर्वम् आगतायाः शङ्कायाः सन्देहस्य वा निरासः कृतः । करणकारकविषये प्रकाशटीकायां प्राप्ताः विचाराः अत्र उपस्थापिताः । एवमेव अग्रेऽपि अन्येष्वपि कारकेषु विद्यमानाः विशिष्टाः सन्देहोपेताः मतभेदोपेताः विचाराः शोधपत्रत्वेन उपस्थापयितुं शक्यन्ते । तेन च कारकाणां स्वरूपविषये स्पष्टं ज्ञानं भवेत् ।

✶ ✶ ✶

Bibliography

1. *वाक्यपदीयम्* (तृतीयं काण्डम्) ; भर्तृहरिः ; डां हरिशचरन्द्रमणित्रिपाठी (प्रकाशकः) ; सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ; वाराणसी ; १९९७ ।
2. *लघुशब्देन्दुशेखरः* (भैरवीसहितो हिन्दीभाष्योपेतश्च कुलपतेः प्रो. राममूर्तिशर्मणः प्रस्तावनया विभूषितः) ; नागेशभट्टः ; डा. तेजपालशर्मा (हिन्दीभाष्यकारः

सम्पादकश्च) ; डां हरिशचरन्द्रमणित्रिपाठी (प्रकाशकः) ;
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ; वाराणसी ; २००२ ।

3. *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्) ; भट्टोजिदीक्षितः ; श्रीगोविन्दाचार्यः (सम्पादकः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०२३ ।
4. *अष्टाध्यायी* (पदच्छेद-वृत्ति-वार्तिक-टिप्पणी-सहिता) ; पाणिनिः ; प्रो. गोपालदत्तपाण्डेयः (सम्पादकः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०१५ ।
5. *परिभाषेन्दुशेखरम्* (सुबोधिनी-हिन्दीव्याख्योपेतः) ; नागेशभट्टः ; आचार्यविश्वनाथमिश्रः (व्याख्याकारः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; १९९० ।
6. *व्याकरणसाहित्येतिहासः* (सुरगिरा-संवलितः) ; डा. ब्रह्मानन्दत्रिपाठी ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०२० ।

सहायकान्तर्जालसूची

7. https ://ashtadhyayi.com/sutraani/1/4/42 ?scroll=sutra-commentary-kaumudi-region & expand=sutra-commentary-kaumudi-region
8. https ://archive.org/

* * *